॥ चतुर्थं द्वैतविवेकप्रकरणम् ॥

चिकीर्षितस्य ग्रन्थस्य निष्प्रत्यूह-परिपूरणाय अभिलषित-देवतातत्त्व-अनुस्मरण-लक्षणं मङ्गलम् आचरन् अस्य वेदान्तप्रकरणत्वात् शास्त्रीयम् एव अनुबन्धचतुष्टयं सिद्धवकृत्य ग्रन्थारम्भं प्रतिजानीते-

ईश्वरेणापि जीवेन सृष्टं द्वैतं विविच्यते ।

विवेके सति जीवेन हेयो बन्धः स्फुटीभवेत् ॥१ ॥

ईश्वरेण जीवेन अपि सृष्टं द्वैतं प्रपञ्च्यते । विवेके सति जीवेन हेयः बन्धः स्फुटीभवेत् ॥१ ॥

ईश्वरेण इति । ईश्वरेण कारण-उपाधिकेन अन्तर्यामिणा जीवेन अपि कार्योपाधिकेन अहंप्रत्ययिना च सृष्टम् उत्पादितं द्वैतं जगत् विविच्यते विभज्य प्रदर्श्यते । अस्य द्वैत-विवेचनस्य काकदन्तपरीक्षावत् निष्प्रयोजनत्वं वारयति- विवेक इति । विवेके सति जीवेश्वरसृष्टयोः द्वैतयोः विवेचने कृते सति जीवेन पूर्वोक्तेन हेयः परित्याज्यः बन्धः बन्धहेतुः द्वैतं स्फुटीभवत् स्पष्टतां गच्छेत् एतावत् जीवेन हेयम् इति निश्चीयते इत्यर्थः ॥१ ॥

ननु अदृष्टद्वारा जीवानाम् एव जगत् हेतुत्वं वादिनः वर्णयन्ति अतः कथम् ईश्वरसृष्टत्वम् उच्यते जगतः । इति आशङ्क्य बहुश्रुति-विरोधात् न इदम् चोद्यम् उत्थापयितुम् अर्हति इति अभिप्रेत्य श्वेताश्वतरवाक्यं तावत् अर्थतः पठति-

मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् ।

स मायी सृजतीत्याहुः श्वेताश्वतशाखिनः ॥२ ॥

मायां तु प्रकृतिम् विद्यात् मायिनं तु । महेश्वरं सः मायी सृजति इति श्वेताश्वरशाखिनः आहुः ॥२ ॥

मायां त्विति । मायोपाधिकम् ईश्वरं प्रस्तुत्य अस्मात् मायी सृजते विश्वम् एतत् श्वे ४-९ तस्य एव ईश्वरस्य जगत्-स्रष्टृत्वं श्वेताश्वतरशाखिनः वर्णयन्ति इत्यर्थः ॥२ ॥

ऐतरयोः उपनिषद्वाक्यं अर्थतः अनुसंक्रामति-

आत्मा वा इदमग्रेऽभूत्स ईक्षत सृजा इति।

संकल्पेनासृजल्लोकान्स एतानिति बह्वृचाः ॥३॥

इदम् अग्रे आत्मा वा अभूत् सः सृजै इति ईक्षत। सः संकल्पेन एतान् लोकान् असृजत् इति बह्वृचाः ॥३॥

आत्मेति। आत्मा चा इदमेक एवाग्र आसीत् नान्यत् किञ्चन मिषत् स ईक्षत लोकान्तु सृजा इति स इमान् लोकान् असृजत ऐत १-१ इत्यनेन वाक्येन अद्वितीयस्य परमात्मनः एव जगत्स्रष्टृत्वं बह्वृचा ऋक्शाखाध्यायिनः आहुः इत्यर्थः ॥३॥

ईश्वरस्य जगत्कारणत्वे तैत्तिरीयश्रुतिः अपि प्रमाणम् इति अभिप्रेत्य तद्वाक्यम् अर्थतः पठति द्वाभ्यां-

खं वाय्वग्निजलोर्व्योषध्यन्नदेहाः क्रमादमी।

संभूता ब्रह्मणस्तस्मादेतस्मादात्मनोऽखिलः ॥४॥

खं वाय्वग्निजलोर्व्योषधिध्यन्नदेहाः अमी अखिलाः क्रमात् तस्मात् एतस्मात् आत्मनः ब्रह्मणः संभूताः ॥४॥

बहु स्यामहमेवातः प्रजायेयेति कामतः।

तपस्तप्त्वाऽसृजत्सर्वं जगदित्याह तित्तिरिः ॥५॥

अहम् एव बहुस्यां अतः प्रजायेय इति कामतः तपः तप्त्वा सर्वं जगत् असृजत् इति तित्तिरिः आह ॥५॥

खमिति। सत्यं ज्ञानम् अनन्तं ब्रह्म तत्ति २-१-१ इति उपक्रम्य तस्माद्वा एतस्मादात्मनः आकाशः सम्भूतः तैत्ति २-१-१ इत्यादिना अन्नात् पुरुषः तैत्ति २-१-१ इति अनेन वाक्येन गुहाहितत्वेन प्रत्यगभिन्नात् ब्रह्मणः आकाशादि-देहपर्यन्तं जगदुत्पन्नं इति अभिधाय उपरिष्टात् अपि सोऽकामयत बहु स्यां प्रजायै इति। स तपोऽतप्यत। स तपस्तप्त्वा इदं सर्वम् असृजत

यदिदं किञ्च तैत्ति २-६ इति वाक्येन तस्यैव ब्रह्मणः जगत्सर्जन-इच्छापूर्वक-पर्यालोचनेन जगत्स्रष्टृत्वं तित्तिरिः आह इत्यर्थः ॥४-५॥

छान्दोग्येऽपि ब्रह्मणः एव जगत्स्रष्टृत्वं आसीत् एकमेवाद्वितीयम् श्रुतिम् इत्यत आह-

इदमग्रे सदेवासीद्बहुत्वाय तदैक्षत।

तेजोऽबन्नाण्डजादीनि ससर्जेति च सामगाः ॥६॥

अग्रे इदं सत् एव आसीत् तत् बहुत्वाय ऐक्षत च तेजोऽबन्नण्डजादीनि ससर्ज इति सामगाः ॥६॥

इदमिति। सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम् (छा ६-२-१) इति सद्रूपम् अद्वितीयं ब्रह्म उपक्रम्य तदेक्षत बहु स्यां प्रजायेयेति। तत्तेजः असृजत (छा ६-२-३) इत्यादिना तस्यैव एक्षणापूर्वकं तेजोऽबन्नस्रष्टृत्वम् अभिधाय तेषां खलु एषां भूतानां त्रीणि एव बीजानि भवन्ति अण्डजं जीवजम् उद्भिज्यम् (छा २-२-१) इत्यादिना अण्दजादि-शरीर-निर्मातृत्वं च सामगाः वर्णयन्ति इत्यर्थः ॥६॥

मुण्डकोपनिषद्यपि तदेतत्सत्यं यथा सुदीप्तात् पावकात् विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः। तथा अक्षरात् विविधाः सोम्य भावाः प्रजायन्ते तत्र चैवापियन्ति (मुण्ड २-१-१) इति अक्षर शब्दवच्यात् ब्रह्मणः जगदुत्पत्तिः श्रूयते इति आह-

विस्फुलिङ्गाः यथा वह्नेर्जायन्तेऽक्षरतस्तथा।

विविधाश्चिज्जडा भावा इत्याथर्वणिका श्रुतिः ॥७॥

यथा वह्नेः विस्फुलिङ्गाः जायन्ते। तथा अक्षरतः विविधाः चिज्जडाः भावाः इति आथर्वणिका श्रुतिः ॥७॥

विस्फुलिङ्गा इति ॥७॥

एवं बृहदारण्यके अपि अव्याकृत-शब्द-वाच्यात् ब्रह्मणः नामरूपात्मकं जगदुत्पन्नम् इति श्रुतिम् आह द्वाभ्याम्-

जगदव्याकृतं पूर्वमासीद्व्याक्रियताऽधुना ।

दृश्याभ्यां नामरूपाभ्यां विराडादिषु ते स्फुटे ॥८ ॥

पूर्वे जगत् अव्याकृतम् आसीत् । अधुना दृश्याभ्यां नामरूपाभ्यां व्याक्रियत । ते विराडादिषु स्फुटे ॥८ ॥

विराण्मनुर्नरा गावः खराश्वाजावयस्तथा ।

पिपीलिकावधि द्वन्द्वमिति वाजसनेयिनः ॥९ ॥

विराट् मनुः नरः गावः खर-अश्व-अजावयः तथा पिपीलिकावधि द्वन्द्वम् इति वाजसनेयिनः ॥९ ॥

जगदिति । तद्धेदं तर्हि अव्याकृतम् आसीत् तन्नमरूपाभ्याम् एव व्याक्रियत असौ नाम अयम् इदंरूपः (बृ १-४-७) इति वाक्येन सृष्टेः पुरा स्पष्टनामरूपत्वेन अव्याकृत-शब्द-वाच्यात् मायोपाधिकात् ब्रह्मणः नामरूप-स्पष्टीकरण-लक्षणा सृष्टिः उक्ता तयोः नमरूपयोः विराडादिषु स्थूलकार्येषु स्पष्टता च तदिदम् अपि एतर्हि नामरूपाभ्याम् एव व्याक्रियते असौ नाम अयम् इदंरूपम् (बृ १-४-९)इति वाक्येन अभिहिता ते च विराडादयः आत्मा एव इदमग्रे आसीत् पुरुषविधः (बृ १-४-१) इत्यादिना एवमेव यदिदं किञ्च मिथुनम् अपि पिपीलिकाभ्यः तत्सर्वम् असृजत (बृ १-४-४) इत्यनेन दर्शिता इत्यर्थः ॥८-९ ॥

उदाहृताभिः श्रुतिभिः द्वैत-सृष्टि-अभिधानान्तरं ब्रह्मणः जीवरूपेण तत्र प्रवेशः अपि अभिहितः इत्याह-

कृत्वा रूपान्तरं जैवं देहे प्राविशदीश्वरः ।

इति ताः श्रुतयः प्राहुर्जीवत्वं प्राणधारणात् ॥१० ॥

ईश्वरः जैवं रूपान्तरं कृत्वा देहे प्राविशत् । इति ताः श्रुतयः आहुः । प्राणधारणात् जीवत्वम् ॥१० ॥

कृत्वेति । श्रुतयः जैवं जीवसंबन्धि-रूपान्तरं अविक्रियब्रह्मणः विलक्षणं विकारिरूपम् इत्यर्थः ।

देहे देहजाते जीवत्वं कुत इत्यत आह- जीवत्वमिति। प्राणादीनां स्वामित्वेन प्रेरकत्वं प्राणधारणं तस्मात् जैवम् रूपं कृत्वा प्राविशत् इति उक्तम् ॥१० ॥

किं तत् इति अपेक्षायाम् आह-

चैतन्यं यदधिष्ठानं लिङ्गदेहश्च यः पुनः।

चिच्छाया लिङ्गदेहस्था तत्सङ्घो जीव उच्यते ॥११ ॥

यत् अधिष्ठानं चैतन्यम्। पुनः यः च लिङ्गदेहः। लिङ्गदेहस्था चिच्छाया। तत्सङ्घः जीवः उच्यते ॥११ ॥

चैतन्यमिति। यदधिष्ठानं लिङ्गदेहकल्पनाधारभूतं यत् चैतन्यम् अस्ति यः च तत्र कल्पितः लिङ्गदेहः यः च तस्मिन् लिङ्गदेहे वर्तमानः चिदाभासः तत्सङ्घः तेषां त्रयाणां समूहः जीव शब्देन उच्यते इत्यर्थः ॥११ ॥

ननु ईश्वरस्य एव जीवरूपेण प्रविष्टत्वे तस्य अज्ञात्व-दुःखित्वादि-विरुद्धधर्मवत्वं कुतः इति आशङ्क्य आह-

माहेश्वरी तु माया या तस्या निर्माणशक्तिवत्।

विद्यते मोहशक्तिश्च तं जीवं मोहयत्यसौ ॥ १२ ॥

माहेश्वरी तु या माया तस्याः निर्माणशक्तिवत् मोहशक्तिः च विद्यते। असौ तं जीवं मोहयति ॥१२ ॥

माहेश्वरी त्विति। माहेश्वरी मायिनं तु महेश्वरम् श्वे ४-१० इति श्रुत्युक्त्या महेश्वरसंबन्धिनी या माया अस्ति तस्याः निर्माणशक्तिवत् जगत्सर्जन-सामर्थ्यवत् मोहशक्तिश्च मोहनसामर्थ्यम् अपि अस्ति तदेतत् जडं मोहत्मकम् नृ उ ता ९ इति श्रुतेः। ततः किम् इत्यत आह- तं जीवम् इति। असौ मोहनशक्तिः तं पूर्वोक्तं जीवं मोहयति चिदानन्दादि-स्वरूपज्ञानरहितं करोति ॥१२ ॥

ततः अपि किं इत्यत आह-

मोहादनीशतां प्राप्य मग्नो वपुषि शोचति ।

ईशसृष्टमिदं द्वैतं सर्वमुक्तं समासतः ॥१३॥

मोहात् अनीशतां प्राप्य वपुषि मग्नः शोचति । इदम् ईशसृष्टं सर्वं द्वैतं समासतः उक्तम् ॥१३॥

मोहादिति । मोहात् पूर्वोक्तात् अनीशतां इष्ट-अनिष्ट-प्राप्ति-परिहारयोः असामर्थ्यं प्राप्य वपुषि निमग्नः शरीरे तादात्म्य-अभिमानं गतः शोचति दुःखित्वात् अभिमानं करोति । समाने वृक्षे पुरुषः निमग्नः अनीशया शोचति मुह्यमानः श्वे ७ मु ३-१-२ इति श्रुतेः इत्यर्थः । वक्ष्यमाण-साङ्कर्य-परिहाराय वृत्तं निगमयति-ईशेति । समासतः -संक्षेपेण इत्यर्थः ॥१३॥

ननु जीवस्य द्वैतस्रष्टृत्वे किं मानम् इति आशङ्क्य आह-

सप्तान्नब्राह्मणे द्वैतं जीवसृष्टं प्रपञ्चितम् ।

अन्नानि सप्त ज्ञानेन कर्मणाऽजनयत्पिता ॥१४॥

सप्तान्नब्राह्मणे जीवसृष्टं द्वैतं प्रपञ्चितम् । पिता सप्त अन्नानि ज्ञानेन कर्मणा अजनयत् ॥१४॥

सप्तन्नेति । कथं तत्र प्रपञ्चितम् इति आशङ्क्य सप्तान्न शब्दवाच्य- द्वैतसृष्टि-प्रतिपादकं यत् सप्तान्नानि मेधया तपसा अजनयत् पिता बृ १-५-१ इति वाक्यम् अर्थतः संगृह्णाति-अन्नानीति । पिता स्वादृष्टद्वारा जगत् उत्पादनेन सर्वलोकपालकः जीवः इत्यर्थः ॥१४॥

ननु अन्नसप्तकसर्जनं किमर्थम् इति आशङ्क्य तद्विनियोगः अपि एकमस्य साधारणं द्वे देवान् अभाजयत् त्रीन्यात्मनि अकुरुत पशुभ्यः एकं प्रायच्छतु बृ १-५-१ इति वाक्येनोक्त इति आह-

मर्त्यान्नमेकं देवान्ने द्वे पश्वन्नं चतुर्थकम् ।

अन्यत्रितयमात्मार्थमन्नानां विनियोजनम् ॥१५॥

एकं मर्त्यान्नम् । द्वे देवान्ने । चतुर्थकं पश्वन्नम् । अन्यत् त्रितयम् आत्मार्थम् । अन्नानां विनियोजनम् ॥१५॥

मर्त्यन्नमिति । विनियोजनम् उक्तमिति ॥१५॥

तानि च सप्तान्नानि एकमस्य साधारणम् इति इदमेव अस्य तत्साधारणम् अन्नं यदिदम् अद्यते बृ १-५-२ इत्यादिना अयमात्मा वाङ्मयः मनोमयः प्राणमयः बृ १-५-३ इत्यन्तेन वाक्यसंदर्भेण एषदूनकण्डिकाद्वयरूपेण दर्शितानि इति आह

व्रीह्यादिकं दर्शपूर्णमासो क्षीरं तथा मनः।

वाक् प्राणश्चेति सप्तत्वमन्नानामवगम्यताम् ॥१६॥

व्रीह्यादिकं दर्शपूर्णमासौ क्षीरं तथा मनः वाक् च प्राणाः इति अन्नानां सप्तत्वं अवगम्यताम् ॥१६॥

व्रीह्यादिकमिति ॥१६॥

ननु उक्तसप्तान्नानां जगदन्त पातित्वेन ईश्वरनिमित्तत्वात् जीव-निर्मितत्त्व-अभिधानम् अयुक्तम् इति आशङ्क्य तत्स्वरूपस्य ईश्वरनिर्मितत्त्वे अपि भोग्यत्व-आकारस्य जीवनिर्मितत्वात् मा एवम् इति आह-

ईशेन यद्यप्येतानि निर्मितानि स्वरूपतः।

तथापि ज्ञानकर्मभ्यां जीवोऽकार्षीत्तदन्नताम् ॥१७॥

यद्यपि एतानि स्वरूपतः ईशेन निर्मितानि। तथापि जीवः ज्ञानकर्मभ्यां तदन्नताम् अकार्षीत् ॥१७॥

ईशेनेति। ज्ञानकर्मभ्यां ज्ञानं विहितं प्रतिषिद्धं देवतापरयोषिदादिविषयध्यानं कर्म च विहितं यज्ञादिरूपं प्रतिषिद्धं हिंसादिरूपं ताभ्याम् इत्यर्थः। तदन्नतां तेषाम् व्रीह्यादि-प्राणान्तानां स्वभोग-उपकरणत्वम् इत्यर्थः ॥१७॥

किमुक्तं भवति इति तत्र आह-

ईशकार्यं जीवभोग्यं जगद्द्वाभ्यां समन्वितम्।

पितृजन्या भर्तृ भोग्या यथा योषित्तथेष्यताम् ॥१८॥

ईशकार्यं जीवभोग्यं जगत् द्वाभ्यां समन्वितम्। यथा योषित् पितृजन्या भर्तृभोग्या। तथा

इष्यताम् ॥१८ ॥

ईशकार्यमिति। जगत् सप्तान्नत्वेन उक्तं व्रीह्यादिरूपं ईशकार्यत्वेन जीवभोग्यत्वेन च द्वाभ्यां सम्बन्धम् इत्यर्थः। एकस्य उभयसंबन्धे दृष्टान्तमाह- पितृजन्येति ॥१८ ॥

ईशजीवयोः जगत्सर्जने किं साधनम् इत्यत आह-

मायावृत्त्यात्मको हीशसंकल्पः साधनं जनौ।

मनोवृत्त्यात्मको जीवसंकल्पो भोगसाधनम् ॥१९ ॥

मायावृत्त्यात्मकः हि ईशसंकल्पः जनैः साधनं मनोवृत्यात्मकः जीवसंकल्पः भोगसाधनम् ॥१९ ॥

मायेति ॥१९ ॥

ननु ईशसृष्ट-वस्तु-स्वरूप-अतिरिक्तः भोग्यत्वाकारः एव नास्ति को जीवेन सृज्यते इति आशङ्क्य आह-

ईशनिर्मितमण्यादौ वस्तुन्येकविधे स्थिते।

भोक्तृधीवृत्तिनानात्वात्तद्भोगो बहुधेष्यते ॥ २० ॥

ईशनिर्मितमण्यदौ एकविधे वस्तु निस्थिते भोक्तृधीवृत्तिनानात्वात् तद्भोगः बहुधा इष्यते ॥२० ॥

ईशनिर्मितेति। एकस्मिन् एव विषये बहुविध-उपभोग उपलभ्यमानः तत्प्रयोजकं भोग्याकारभेदं गमयति इत्यर्थः ॥२० ॥

ननु सति भोगभेदे भोग्यभेदः कल्प्येत स एव नास्ति इति आशङ्क्य दृश्यमानत्वाय् मा एवम् इति आह-

हृष्यत्येको मणिं लब्ध्वा क्रुद्ध्यत्यन्यो ह्यलाभतः।

पश्यत्येव विरक्तोऽत्र न हृष्यति न कुप्यति ॥ २१ ॥

एकः मणिं लब्ध्वा हृष्यति हि। अन्यः अलाभतः क्रुद्ध्यति। अत्र विरक्तः पश्यति एषः। न हृष्यति न क्रुद्ध्यति ॥२१ ॥

हृष्यति इति। एकः मण्यर्थी तं लब्ध्वा हृष्यति अन्यः तथाविधः तदलाभात् क्रुध्यति। अत्र मणौ विषये विरक्तः तु तं मणिं पश्यति एव लाभालाभनिमित्तौ हर्षक्रोधौ न प्राप्नोति इत्यर्थः ॥२१॥

के ते भोग-भेद-उपरक्ता जीवसृष्टा आकारभेदा इत्यत आह-

प्रियोऽप्रिय उपेक्ष्यश्चेत्याकारा मणिगास्त्रयः।

सृष्टा जीवैरीशसृष्टं रूपं साधारणं त्रिषु॥ २२॥

मणिगाः प्रियः अप्रियः च उपेक्ष्यः इति त्रयः आकाराः जीवैः सृष्टाः। त्रिषु साधारणं रूपम् ईशसृष्टम् ॥२२॥

प्रिय इति। मणिनिष्ठाः प्रियत्व-अप्रियत्व-उपेक्ष्यत्व-लक्षणा आकारभेदा जीवैः सृष्टाः त्रिषु अपि साधरणमनुस्यूतं यत् मणिरूपं तद् ईश्वरनिर्मितम् इत्यर्थः ॥२२॥

उक्तं जीवसृष्टाकार -भेदं उदाहरणान्तरेण स्पष्टयति-

भार्या स्नुषा ननान्दा च याता मातेत्यनेकधा।

प्रतियोगिधिया योषिद् भिद्यते न स्वरूपतः॥ २३॥

भार्या स्नुषा ननान्दा याता च माता इति अनेकधा योषित् प्रतियोगिधिया भिद्यते। न स्वरूपतः ॥२३॥

भार्येति। ननान्दा भर्तृभगिनी याता देवरपत्नी प्रतियोगिधिया भर्तृश्वशुरादि-लक्षण-प्रतियोगि-गोचरया बुद्ध्या तत्तद् अपेक्षय इत्यर्थः ॥२३॥

ननु योषिद्विषयाणि भार्या-स्नुषा इत्यादि ज्ञानान्येव भिन्नात् उपलभ्यन्ते न तु तद्विषयभूतायाः योषितः स्वरूपे भेदः दृश्यते अतः प्रतियोगिधिया योषिद्भिद्यते प्र ४-२३ इत्युक्तम् अयुक्तम् इति शङ्कते-

ननु ज्ञानानि भिद्यन्तामाकारस्तु न भिद्यते।

योषिद्वपुष्यतिशयो न दृष्टो जीवनिर्मितः॥ २४॥

ननु ज्ञानानि भिद्यन्ताम् आकारः तु न भिद्यते। योषिद् वपुषि जीवनिर्मितः अतिशयः न दृष्टः ॥२४॥

नन्विति ॥२४॥

ज्ञानवैलक्षण्यस्य ज्ञेयवैलक्षण्य-अविनाभूतत्वात् ज्ञेयाकारभेदः अङ्गीकर्तव्य एव इत्याशयेन परिहरति-

मैवं मांसमयी योषित् काचिदन्या मनोमयी।

मांसमय्या अभेदेऽपि भिद्यते हि मनोमयी॥ २५॥

मा एवम्। काचित् मांसमयी योषित्। अन्या मनोमयी। मासमय्याः अभेदे अपि मनोमयी हि भिद्यते ॥२५॥

मैवमिति ॥२५॥

ननु भ्रान्यादिस्थले बाह्यविषय-अभावात् तत्रत्यं वस्तु मनोमयम् अस्तु प्रमितिस्थले तु तदनुपपन्नं बाह्यवस्तुनः सत्त्वात् इति शङ्कते-

भ्रान्ति-स्वप्न- मनोराज्य- स्मृतिष्वस्तु मनोमयम्।

जाग्रन्मानेन मेयस्य न मनोमयतेति चेत्॥ २६॥

भ्रान्ति-स्चप्न-मनोराज्य-स्मृतिषु मनोमयम् अस्तु। जाग्रन्मानेन मेयस्य मनोमयता न इति चेत्॥२६॥

भ्रान्तीति। मानेन प्रत्यक्षादिप्रमाणेन मेयस्य प्रमेयस्य इत्यर्थः ॥२६॥

प्रमितिस्थले बाह्यं विषयसत्त्वम् अङ्गीकरोति-

बाधं माने तु मेयेन योगात् -स्याद्विषयाकृतिः।

भाष्य- वार्तिककाराभ्याम् अयम् अर्थ उदीरितः॥ २७॥

बाढम्। माने विषयाऽऽकृतिः तु मेयेन योगात् स्यात्॥ भाष्यवार्तिककाराभ्यां अयम् अर्थः उदीरितः ॥२७॥

बाढमिति। कथं तर्हि तद्विषयस्य मनोमयत्वम् उच्यते इत्यत आह- माने त्विति। माने विषयाकृतिः तु तस्य मेयेन योगात् संबन्धात् स्यात्। ननु इयम् स्वकपोल-कल्पितम् इति आशङ्क्य आह-भष्येति ॥२७॥

तर्त तावत् भाष्यकारवचनम् उदाहरति-

मूषासिक्तं यथा ताम्रं तन्निभं जायते तथा।

रूपादीन् व्याप्नुवच्चित्तं तन्निभं दृश्यते ध्रुवम्॥ २८॥

यथा ताम्रं मूषासिक्तं तन्निभं जायते। तथा रूपादीन् व्याप्नुवत् चित्तं ध्रुवं तन्निभं दृश्यते ॥२८॥

मूषेति। यथा द्रुतं ताम्रं मूषायां सिक्तं सत् तन्निभं जायते तत् समानाकारवत् भवति तथा रूपादीन् विषयान् व्याप्नुयात् विषयीकुर्वच्चित्तं ध्रुवं अवश्यं तन्निभं दृश्यते उपलभ्यते इत्यर्थः ॥२८॥

ननु ताम्रादेः अग्निसंपर्कात् द्रुतस्य मूषानिषिक्तस्य कठिनमूषाभिघातेन शैत्यापत्तौ मूषाकारापत्तौ अपि बुद्धेः अमूर्तायाः ताम्रादिविलक्षणायाः विषयव्याप्तौ अपि कुतः तदाकारापत्तिः इति आशङ्क्य दृष्टान्तरम् आह-

व्यञ्जको वा यथाऽऽलोको व्यङ्ग्यस्याकारतामियात्।

सर्वार्थ-व्यञ्जकत्वाद्धीरर्थाकारा प्रदृश्यते॥ २९॥

यथा वा व्यञ्जकः आलोकः व्यंग्यस्य आकरतां इयात्। धीः सर्वार्थ-व्यञ्जकत्वात् अर्थाकारा प्रदृश्यते ॥२९॥

व्यञ्जक इति। यथा वा व्यञ्जकः प्रकाशकः आलोकः आतपादिव्यङ्ग्यस्य प्रकाशस्य घटादेः आकारताम् आकारवत्ताम् इयात् प्राप्नुयात् एवं धीः अपि सर्वार्थस्य व्यञ्जकत्वात् सकल-पदार्थ-प्रकाशवत्वात् अर्थाकारा गर्भस्याकारः इव आकारः यस्याः सा तया प्रदृश्यते प्रकर्षेण उपलभ्यते इत्यर्थः ॥२९॥

इदानीं वार्तिकाकारवचम् आह-

मातुर्मानाभिनिष्पत्तिर्निष्पन्नं मेयमेति तत्।

मेयाभिसंगतं तच्च मेयाभत्वं प्रपद्यते॥ ३०॥

मातुः मानाभिनिष्पत्तिः। निष्पन्नम् तत् मेयम् एति च। तत् मेयाभिसंगतं मेय आभत्वं प्रपद्यते॥३०॥

मातुरिति। मातुः साधिष्ठान-बुद्धिस्थ-चिदाभास-रूपात्-प्रमातुः मानाभिनिष्पत्तिः मानस्य साभास-अन्तःकरण-वृत्तिरूपस्य अभिनिष्पत्तिः उत्पत्तिः भवतीति शेषः। निष्पन्नम् उत्पन्नं तन्माने मेयं घटादिरूपम् एति प्राप्नोति। किञ्च तन्मानं मेयाभिसंगतं प्रमेयेण संबद्धं सन्मेयामत्वं यस्य तन्मेयाभं तस्त भावः तत्त्वं मेयसमानाकारतां प्रपद्यते प्राप्नोतीत्यर्थः॥३०॥

भवतु एवं प्रकृते किम् आयातम् इत्यत आह-

सत्येवं विषयौ द्वौ स्तो घटौ मृण्मयधीमयौ।

मृण्मयो मानमेयः स्यात् साक्षिभास्यस्तु धीमयः॥ ३१॥

एवं सति मृन्मयधीमयौ घटौ विषयौ द्वौ स्तः। मृन्मयः मानमेयः धीमयः तु साक्षिभास्यः स्यात्॥३१॥

सत्येवमिति। ननु मृन्मयघटस्य एव मनोमयघटस्य तेनैव मनसा ग्रहीतिम् अशक्तत्वात् ग्राहकान्तर-अभावात् च असिद्धिः एव इति आशङ्क्य ग्राहकान्तर-अभाव-असिद्धः इति आह-मृन्मय इति। यथा मृन्मयः मायमेनः तथा धीमयः साक्षिभास्यः इत्यर्थः॥३१॥

भवतु एवं द्विविधं द्वैतं अत्र कस्य हेयत्वं कस्य वा नेति न ज्ञायते इति आशङ्क्य जीवसृष्टस्य एव हेयत्वम् इति अभिप्रेत्य तस्य बन्धहेतुत्वं दर्शयति-

अन्वयव्यतिरेकाभ्यां धीमयो जीवबन्धकृत्।

सत्यस्मिन् सुखदुःखे स्तस्तस्मिन्नसति न द्वयम्॥ ३२॥

अन्वयव्यतिरेकाभ्यां धीमयः जीवबन्धकृत्। अस्मिन् सति सुखदुःखे स्तः। असति तस्मिन् न

द्वयम् ॥३२॥

अन्वयेति। अन्वयव्यतिरेकौ एव दर्शयति- सत्यस्मिन् इति। अस्मिन् जीवसृष्टे मानसप्रपञ्चे सति विद्यमाने सुखदुःखे स्तः भवतः असति तु तस्मिन् न द्वयं सुखं दुःखं च न अस्ति इत्यर्थः ॥३२॥

ननु उक्तवत् अन्वयव्यतिरेकौ बाह्यार्थविषयौ किं न स्यात् इत्यत आह-

असत्यपि च बाह्यार्थे स्वप्नादौ बध्यते नरः।

समाधिसुप्तिमूर्च्छासु सत्यप्यस्मिन्न बध्यते ॥ ३३॥

नरः स्वप्नादौ बाह्यार्थे च असति अपि बद्धयेत। समाधिसुप्तमूर्च्छासु अस्मिन् सति अपि न बद्धयते ॥३३॥

असतीति। नरः मनुष्यः अतद् उपलक्षणम् अन्येषाम् अपि। स्वप्नादौ स्वप्नस्मृत्यदिकाले बाह्यार्थे अनुकूले योषिदादौ प्रतिकूले व्याघ्रादौ च पारमर्थिके विषये असत्यापि अविद्यमाने अपि बध्यते सुखदुःखाभ्यां युज्यते समाध्यादिषु तु अस्मिन् बाह्यार्थे सत्यपि न बध्यते न सुखदुह्खादिभाग् भवति अतः तद्विषयौ अन्वयव्यतिरेकौ न स्तः इत्यर्थः ॥३३॥

मनोमयप्रपञ्चस्य बन्धकत्वेन-अन्वयव्यतिरेकौ उदाहरणेन स्पष्टयति-

दूरदेशं गते पुत्रे जीवत्येवात्र तत्पिता।

विप्रलम्भकवाक्येन मृतं मत्वा प्ररोदिति ॥ ३४॥

दूरदेशं गते पुत्रे जीवति एव अत्र तत्पिता विप्रलंभकवाक्येन मृतं मत्वा प्ररोदिति ॥३४॥

दूरदेशमिति। देशान्तरं प्राप्ते पुत्रे तत्र जीवति एव सति अत्र स्वगृहं स्थितः तस्य पिता विप्रलम्भकस्य मिथ्यावचनैः परवञ्चकस्य त्वत्पुत्रः मृतः इति एवंरूपेण वाक्येन स्वपुत्रं मृतं कल्पयित्वा प्रकर्षेण रोदनं करोति ॥३४॥

मृतेऽपि तस्मिन् वार्तायामश्रुतायां न रोदिति।

अतः सर्वस्य जीवस्य बन्ध कृन्मानसं जगत् ॥ ३५॥

तस्मिन् मृते अपि वार्तायाम् अश्रुतायां न रोदिति। अतः सर्वस्य जीवस्य मानसं जगत् बन्धकृत्॥३५॥

तस्मिन् एव पुत्रे तत्रैव मृते अपि तन्मृतिवार्तायाम् अश्रुतायां सत्यां न रोदनं करोति। फलितम् आह- अत इति॥३५॥

धीमयस्य एव जगतः बन्धहेतुत्वात् अङ्गीकारे बाह्यार्थापलापादपसिद्धान्तापातः स्यात् इति शङ्कते-

विज्ञानवादो बाह्यार्थवैयर्थ्यात् स्यादिहेति चेत्।

न हृद्याकारमाधातुं बाह्यस्यापेक्षितत्वतः॥ ३६॥

बाह्यार्थे वैय्यर्थ्यात् इह विज्ञानवादः स्यात् इति चेत्। न हृदि आकारं आधातुं बाह्यस्य अपेक्षितत्वतः॥३६॥

विज्ञानेति। परिहरति-नति। यद्यपि मानसप्रपञ्चस्याव बन्धहेतुत्वं तथापि तद् हेतुत्वेन बाह्यार्थस्यापि स्वीकारात् न विज्ञानवादप्रसङ्गः इति भावः॥३६॥

ननु न हृद्याकारसमर्पणाय बाह्यपदार्थः अपेक्षणीयः पूर्वपूर्व-मानसप्रपञ्च-संस्कारस्य एव उत्तरत्तर-मानसप्रपञ्च-हेतुत्व-उपपत्तेः इति आशङ्क्य प्रौडव्वदेन तद् अङ्गीकरोति-

वैयर्थ्यमस्तु वा बाह्यं न वारयितुमीश्महे।

प्रयोजनमपेक्षन्ते न मानानीति हि स्थितिः॥ ३७॥

वा वैयर्थ्यम् अस्तु। बाह्यं वार्यितुं न ईश्महे। मानानि प्रयोजनं न अपेक्षन्ते इति हि स्थितिः॥३७॥

वैयर्थ्यमिति। तर्हि विज्ञानवादात्कः भेदः इत्यत आह-बाह्यमिति। विज्ञानवादिनः बाह्यार्थमेव अपलपन्ति वयं न तथा इति अयमेव भेदः इत्यर्थः। प्रयोजनशून्यत्वात् अभ्युपगमः अपि अयुक्तः एव इति आशङ्क्य आह-प्रयोजनमिति। मानाधीना वस्तुसिद्धिः न प्रयोजनाधीनाः मानसिद्धस्य प्रयोजनशून्यत्वमात्रेण असत्त्वस्य लौकिकैः वादिभिः वा अनभ्युपगमात् इति

भावः ॥३७॥

मानसद्वैतस्यैव बन्धहेतुत्वे तस्य मनोनिरोध-आत्मकयोगेनैव निवृत्तिसंभवत् ब्रह्मज्ञानस्य बन्धनिवर्तकत्व-अभ्युपगमः विरुध्येते इति शङ्कते-

बन्धश्चेन्मानसद्वैतं तन्निरोधेन शाम्यति।

अभ्यासेद्योगमेवातो ब्रह्मज्ञानेन किं वद॥ ३८॥

मानसं द्वैतं बन्धः चेत्। तत् निरोधेन शाम्यति। अतः योगम् एव अभ्यसेत्। ब्रह्मज्ञानेन किं वद ॥३८॥

बन्धश्चेदिति ॥३८॥

योगेन किं द्वैतोपशमः तात्कालिकः उच्यते आत्यन्तिकः वा। विकल्प्य आद्यम् अङ्गीकृत्य द्वितीयं दूषयति-

तात्कालिक-द्वैत शान्तौ अप्यागामी-जनिक्षयः।

ब्रह्मज्ञानं विना न स्याद् इति वेदान्त-डिण्डिमः॥ ३९॥

तात्कालिकद्वैतशान्तः अपि आगामिजनिक्षयः ब्रह्मज्ञानं विना न स्यात् इति वेदान्तडिंडिमः ॥३९॥

तात्कालिकेति। ज्ञात्वा देवं मुच्यते सर्वपाशैः स्वे १-८ २-१-१२ ५-१३ ज्ञात्वा शिवं शान्तिम् अत्यन्तं एति स्वे ४-१४ यदा चर्मवद् आकाशं वेष्टयिष्यन्ति मानवाः। तदा देवम् अविज्ञाय दुःखस्यान्तः भविष्यति। स्वे ६-२० इत्यादि श्रुतिषु अन्वय-व्यतिरेकाभ्यां ब्रह्मज्ञानात् एव बन्धनिवृत्तिः अभिधीयते इति भावः ॥३९॥

ननु बाह्यद्वैतनिवारणं अन्तरेण अद्वितीयब्रहमज्ञानं एव न उदीयात् इति आशङ्क्य तन्निवारण-अभावे अपि तस्य मिथ्यात्वज्ञानात् एव पारमार्थिकम् अद्वैतं बोद्धुं शक्यते इति आह-

अनिवृत्तेऽपीशसृष्टे द्वैते तस्य मृषात्मताम्।

बुद्ध्वा ब्रह्माद्वयं बोद्धुं शक्यं वस्त्वैक्यवादिनः॥ ४०॥

ईशसृष्टे द्वैते अनिवृत्ते अपि तस्य मृषात्मताम् बुध्वा वस्त्यैक्यवादिनः अद्वयं ब्रह्म बोद्धुं शक्यम् ॥४० ॥ ।

अनिवृत्ते अपि इति ॥४० ॥

न द्वैतमृषात्वज्ञानम् अद्वैतज्ञानप्रयोजकम् अपि तु तन्निवारणम् एव इति अभिनिवेशमानं प्रत्याह-

प्रलये तन्निवृत्तौ तु गुरुशास्त्राद्यभावतः ।

विरोधिर्द्वैताभावेऽपि न शक्यं बोद्धुमद्वयम् ॥ ४१ ॥

प्रलये तन्निवृत्तौ तु विरोधि-द्वैत-अभावे अपि गुरुशास्त्राद्यभावतः अद्वयं बोद्धुं शक्यं न ॥४१ ॥

प्रलय इति । प्रलये प्रलय-अवस्थायां तन्निवृत्तौ तु तस्य द्वैतस्य निवृत्तौ सत्यां तु विरोधिद्वैत-अभावे अपि अद्वैतज्ञानविरोधित्वेन भवद्भिमतस्य द्वैतस्य अनिवारणे सत्यपि गुरुशास्त्राद्यभावतः गुरुशास्त्रादिरूपस्य तस्य ज्ञानसाधनस्य अभावात् हेतोः अद्वयं वस्तु बोद्धुं शक्यं न भवति अतः तन्निवारणं अप्रयोजकं इति भावः ॥४१ ॥

तथापि सति द्वैतं कथम् अद्वैतज्ञानम् इति आशङ्क्य आह-

अबाधकं साधकं च द्वैतमीश्वरनिर्मितम् ।

अपनेतुमशक्यं चेत्यास्तां तद् द्विष्यते कुतः ॥ ४२ ॥

ईशवरनिर्मितं द्वैतं अबाधकं व साधकं च अपनेतुं अशक्यं इति तत् आस्तां । कुतः द्विष्यते ॥४२ ॥

अबाधकमिति । ईश्वरनिर्मितं द्वैतम् अबाधकं तन्मृषात्वज्ञानेनैव अद्वैतज्ञानोत्पत्तेः उक्तत्वात् साधकं च गुरुशास्त्रादिरूपस्य तस्य ज्ञानसाधनत्वात् आकाशादिरूपद्वैतं अस्माभिः अपनेतुं अशक्यं चेति हेतोः तद् द्वैतम् आस्तां कुतः कारणात् द्विष्यते इत्यर्थः ॥४२ ॥

इदानीं जीवसृष्टद्वैतं विभजते-

जीवद्वैतं तु शास्त्रीयम् अशास्त्रीयम् इति द्विधा ।

उपाददीत शास्त्रीयम् आतत्त्वस्यावबोधनात्॥ ४३॥

जीवद्वैतं तु शास्त्रीयम् अशास्त्रीयम् इति द्विधा। तत्त्वस्य अवबोधनात् आ। शास्त्रीयं उपाददीत ॥४३॥

जीवेति। किं तत् द्विविधम् अपि सदा हेयमेव। नेत्याह- उपाददीत इति। आ तत्त्वस्य अवबोधनात् तत्त्वस्य अवबोधनपर्यन्तम् इत्यर्थः ॥४३॥

किं तच्छास्त्रीयं द्वैतम् इति आकाङ्क्षायाम् आह-

आत्मब्रह्मविचाराख्यं शास्त्रीयं मानसं जगत्।

बुद्धे तत्त्वे तच्च हेयम् इति श्रुत्यनुशासनम्॥ ४४॥

आत्मब्रह्मविचाराख्यं शास्त्रीयं मानसं जगत्। तत्त्वे बुद्धे तत् च हेयं इति श्रुत्यनुशासनम्॥४४॥

आत्मेति। प्रत्यग्रूपस्य ब्रह्मणः विचाराख्यं यत् श्रवणादिकं तत् शास्त्रीयं मानसं जगत् इत्यर्थः। ननु आतत्त्वस्य अवबोधनात् इत्युक्तम् अनुपपन्नम् आ सुप्तेरा मृते कालं नयेत् वेदान्तचिन्तया इति उक्तत्वात् इति आशङ्क्य आह- बुद्धे इति। तत्वे ब्रह्मात्मैक्यलक्षणे बुद्धे साक्षात्कृते सति इत्यर्थः। तर्हि आसुप्तेः इति वाक्यस्य का गतिः इति चेत् दद्यान्नावसरं किञ्चित् कामादीनां मनागपि इति पूर्वार्धे कामाद्यवसरप्रधानस्य निषिद्धत्वात् तत्परतैवेति वदामः अतः न कापि अनुपपत्तिः इति भावः॥ ।४४॥

तत्त्वबोधोत्तरकालं तद्धेयत्व-प्रतिपादनपराः श्रुतिः उदाहरति-

शास्त्राण्यधीत्य मेधावी अभ्यस्य च पुनः पुनः।

परमं ब्रह्म विज्ञाय उल्कावत्तान्यथोत्सृजेत्॥ ४५॥

मेधावी शास्त्राणि अधीत्य च पुनः पुनः अभ्यस्य परमं ब्रह्म विज्ञाय अथ उल्कावत् तानि उत्सृजेत्॥४५॥

ग्रन्थमभ्यस्य मेधावी ज्ञान विज्ञानतत्परः।

पलालमिव धान्यार्थी त्यजेद्-ग्रन्थमशेषतः ॥ ४६ ॥

मेधावी ग्रन्थं अभ्यस्य ज्ञानविज्ञानतत्परः सन् धन्यार्थी पलालम् इव अशेषतः ग्रन्थं त्यजेत् ॥४६ ॥

तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः ।

नानुध्यायात् बहून् शब्दान् वाचो विग्लापनं हि तत् ॥ ४७ ॥

धीरः ब्राह्मणः तमेव विज्ञाय प्रज्ञां कुर्वीत । बहून् शब्दान् न अनुध्यायात् हि तत् वाचः विग्लापनम् ॥४७ ॥

शास्त्राणोत्यारभ्य ॥४५-४७ ॥

तमेवैकं विजानीथ ह्यन्या वाचो विमुञ्चथ ।

यच्चेद्वाङ्मनसी प्राज्ञ इत्याद्याः श्रुतयः स्फुटाः ॥ ४८ ॥

एकं तमेव विजानीथ हि । अन्याः वाचः विमिञ्चत । प्राज्ञः वाङ्मनसी यच्छेत् इत्याद्याः श्रुतयः स्फुटाः ॥४८ ॥

तमेवैकं विजानीथ इत्यनेन तमेवैकं जानथ आत्मानम् अन्या वाचः विमुञ्चथ मुण्ड २-२-५ अमृतसैष सेतुः मुण्ड २-२-५ इति श्रुतिरर्थः पठितः इति ॥४८ ॥

अशास्त्रीयस्य अपि द्वैतस्य अवान्तरभेदम् आह-

अशास्त्रीयमपि द्वैतं तीव्रं मन्दमिति द्विधा ।

कामक्रोधादिकं तीव्रं मनोराज्यं तथेतरत् ॥ ४९ ॥

अशास्त्रीयं द्वैतम् अपि तीव्रम् । भेदम् इति द्विधा । कामक्रोधादिकं तीव्रम् । तथा मनोराज्यम् इतरत् ॥४९ ॥

अशास्त्रीयमिति । द्विधा द्विविधम् अपि क्रमेण उदाहरति-कामेति । इतरत् मन्दम् इत्यर्थः ॥४९ ॥

किम् अनयोः शास्त्रीयद्वैतस्य एव तत्त्वबोधोत्तरकालम् एव हेयत्वम्। न इति आह-

उभयं तत्त्वबोधात्प्राङ्निवार्यं बोधसिद्धये।

शमः समाहितत्वं च साधनेषु श्रुतं यतः॥ ५०॥

उभयं तत्त्वबोधात् प्राक् निवार्यम्। बोधसिद्धये। यतः शमः च समाहितत्वं साधनेषु श्रुतम्॥५०॥

उभयमिति। प्राङ्निवारणं किमर्थम् इत्यत आह- बोधसिद्धये इति। तत्रलिङ्गमाह- शम इति। यतः तत्त्वबोधात् प्राक् तयोः हयत्वं ततः एव नित्यानित्यवस्तुविवेकादि-ब्रह्मज्ञान-साधनेषु मध्ये शान्तः समाहितः इति पदाभ्यां शान्तिसमाधी श्रूयेते इत्यर्थः॥५०॥

ननु तत्त्वबोधात् प्राङ्-निवार्यं प्र ४-५० इत्यभिधानात् उत्तरकालमस्य स्वीकार्यता स्यात् इति आशङ्क्य आह-

बोधादूर्ध्वं च तद्धेयं जीवन्मुक्तिप्रसिद्धये।

कामादिक्लेशबन्धेन युक्तस्य न हि मुक्तता॥ ५१॥

च बोधात् ऊर्ध्वं जीवन्मुक्तिप्रसिद्धये तत् हेयम्। कामादिक्लेशबन्धेन युक्तस्य मुक्तता न हि॥५१॥

बोधात् इति। उक्तम् अर्थं व्यतिरेकमुखेन द्रढयति-कामादीति। कामादिरूपः यः क्लेशः सः एव बन्धः तेन मुक्तस्य बद्धस्य मुक्तता जीवन्मुक्तत्वं न हि नास्ति एव इत्यर्थः॥५१॥

ननु जन्मादिसंसारात् उद्विग्नस्य आत्यन्तिक-पुरुषार्थरूपया विदेहमुक्त्यैव अलं किमनया आपातिकया जीवन्मुक्त्येति शङ्कते-

जीवन्मुक्तिरियं मा भुज्जन्माभावे त्वहं कृती।

तर्हि जन्मापि तेऽस्त्वेव स्वर्गमात्रात् कृती भवान्॥ ५२॥

इयं जीवन्मुक्तिः मा भूत्। तु जन्माभावे अहं कृती।तर्हि जन्म अपि ते अस्तु एषा। स्वर्गमात्रात् भवान् कृती॥५२॥

जीवन्मुक्तिरिति। ऐहिक-भोग-निवृत्तिभयात् जीवन्मुक्तित्यागे आमुष्मिक-भोग-निवृत्ति-भयात् विदेहमुक्तिः अपि त्याज्या स्यात् इति प्रतिबन्द्या परिहरति- तर्हीति ॥५२॥

प्रतिबन्धी मोचनं शङ्कते-

क्षयातिशयदोषेण स्वर्गो हेयो यदा तदा।

स्वयं दोषतमात्मायं कामादिः किं न हीयते॥ ५३॥

क्षयातिशयदोषेण स्वर्गः हेयः यदा। तदा स्वयं दोषतमा आत्मा अयं कामादिः किं न हीयते ॥५३॥

क्षयेति। दोषम् उक्तत्वेन स्वर्गादिः त्याज्यत्वे सकल-पुरुषार्थ-विघातकत्वेन अतीव दोषरूपस्य कामादेः सुतरां त्याज्यत्वम् इत्यत आह- तदेति ॥५३॥

ननु वैराग्यादि-संपादनेन आत्यन्त-आनर्थ्य-हेतोः कामादेः त्यक्तत्वात् ऐहिकभोगमात्र-उपयोगिकामात् अभ्युपगमे कः दोषः इति आशङ्क्य आह-

तत्त्वं बुद्ध्वापि कामादीन्निःशेषं न जहासि चेत्।

यथेष्टाचरणं ते स्यात् कर्मशास्त्रातिलङ्घिनः॥ ५४॥

तत्त्वं बुद्ध्वा अपि निःशेषं कामादीन् न जहासि चेत् कर्मशास्त्रातिलङ्घिनः ते यथेष्टाचरणं स्यात् ॥५४॥

तत्त्वमिति। तत्त्ववित्त्व-अभिमानेन विधिनिषेध-शास्त्रम् अतिक्रम्य कामात् अधीनतया वर्तमानस्य तव यथेष्टाचरणं स्यात् इत्यर्थः ॥५४॥

अस्तु कः दोषः इति आशङ्क्य तद् अनिष्टत्व-प्रतिपादनपरं सुरेश्वराचार्यवचनम् उदाहरति-

बुद्धाद्वैतस्वतत्त्वस्य यथेष्टाचरणं यदि।

शुनां तत्त्वदृशां चैव को भेदोऽशुचिभक्षणे॥ ५५॥

बुद्धाद्वैतसतत्त्वस्य यथेष्टाचरणं यदि। अशुचिभक्षणे। शुनां च एव तत्त्वदृशां कः भेदः ॥५५॥

बुद्धाद्वैतेति। बुद्धं अद्वैतस्वतत्त्वम् अद्वैतस्वरूपं ब्रह्म येन सः बुद्धाद्वैतस्वतत्त्वः तत्त्ववित् तस्य यथेष्टाचरणं यदि स्यात् तर्हि अशुचि-भक्षणादिकम् अपि स्यात् तथा सति शुनां तत्त्वदृशां चैव न कोऽपि विशेषः स्यात् इत्यर्थः ॥५५॥

एतावता किम् अनिष्टं आपादितम् इति आशङ्क्य सोपहासम् उत्तरम् आह-

बोधात्पुरा मनोदोषमात्रात्क्लिश्नास्यथाधुना।

अशेषलोकनिन्दा चेत्यहो ते बोध वैभवम्॥ ५६॥

बोधात् पुरा मनोमात्रदोषात् क्लिश्नासि। अथ अधुना च अशेषलोकनिन्दा। इति ते भोगवैभवम् अहो ॥५६॥

बोधादिति। तत्त्वज्ञानोदयात् प्राक् कामक्रोधादि-चित्तदोषैः तव क्लेशः अभूत् इदानीं तु सर्वलोकनिन्दाम् अपि सहस्व इति क्लेशद्वैगुण्यम् इति भावः ॥५६॥

तर्हि किं कर्तव्यम् इत्यत आह-

विड्वराहादितुल्यत्वं मा काङ्क्षीस्तत्त्वविद्भवान्।

सर्वधीदोषसंत्यागाल्लोकैः पूज्यस्व देववत्॥ ५७॥

तत्त्ववित् भवान् विड्वराहादितुल्यत्वं मा काङ्क्षीः सर्वधीदोषसंत्यागात् लोकैः देववत् पूज्यस्व ॥५७॥

विड्वराहेति। सर्वोत्कर्ष-हेतुज्ञानवान् त्वं कामादि-त्याग-शक्तत्वेन सर्वाधम-विड्वराहादिसाम्यं मा काङ्क्षीः कामादि-लक्षण-सकलमनोदोष-हानेन सर्वजनैः देववत् पूज्यस्व पूज्यः भवेत्यर्थः ॥५७॥

तत्त्यागोपायम् आह-

काम्यादिदोषदृष्ट्याद्याः कामादित्यागहेतः।

प्रसिद्धा मोक्षशास्त्रेषु तानन्विष्य सुखी भव॥ ५८॥

काम्यादिदोषदृष्टाद्याः कामादित्यागहेतवः। मोक्षशास्त्रेषु प्रसिद्धाः। तान् अन्विष्य सुखी

भव ॥५८ ॥

काम्येति। काम्याः कामनाविषयाः स्त्रगादयः आदयः येषां द्वेष्यादीनां ते काम्यादयः तेषां ये दोषाः अनित्यत्व-सातिशयत्वादयः तेषां दृष्टिः अवलोकनम् आद्यं येषां कामस्वरूप-विचारादनां ते तथोक्ताः तेषाम्। कामादित्यागहेतुत्वे प्रमाणम् आह-प्रसिद्धा इति। भवतु ततः किमायातम् इत्यत आह- तानन्विष्येति ॥५८ ॥

ननु कामादीनाम् अर्थहेतुत्वात् त्याज्यत्वम् अस्तु मनोराज्यस्य तु अतथात्वात्तत्त्यागोन अपेक्षते इति शङ्कते-

त्यज्यताम् एष कामादिर्मनोराज्ये तु का क्षतिः।

अशेषदोषबीजत्वात् क्षतिर्भगवतेरिता ॥ ५९ ॥

एषः कामादिः त्यज्यताम्। तु मनोराज्ये का क्षतिः। अशेषदोषबीजत्वात् भगवता क्षतिः ईरिता ॥५९ ॥

त्यज्यतामिति। साक्षात् अनर्थ-हेतुत्व-अभावे अपि परम्परया तद्धेतुत्वात् त्याज्यत्वम् एव इति अभिप्रेत्य परिहरति- अशेषेति ॥५९ ॥

ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते।

सङ्गात्संजायते कामः कामात्क्रोधोऽभिजायते ॥ ६० ॥

विषयान् ध्यायतः पुंसः तेषु संगः उपजायते। संघात् कामः संजायते। कामात् क्रोधः अभिजायते ॥६० ॥

परम्परया अनर्थहेतुत्व-प्रदर्शनपरं भगवद्वाक्यं गी २-६२ उदाहरति-ध्यायत इति ॥६० ॥

परम्परया अनर्थहेतुत्व-प्रदर्शनपरं भगवद्वाक्यं गी २-६२ उदाहरति-ध्यायत इति ॥६० ॥

क्रोधात् भवति सम्मोहः सम्मोहात् स्मृतिविभ्रमः।

स्मृतिभ्रंशात् बुद्धिनाशः बुद्धिनाशात् प्रणश्यति ॥ ६१ ॥

क्रोधात् सम्मोहः भवति सम्मोहात् स्मृतिविभ्रमः । स्मृतिभ्रंशात् बुद्धिनाशः बुद्धिनाशात् प्रणश्यति ॥ ६१ ॥

तर्हि अस्य मनोराज्यस्य कः परिहारोपायः इत्यत आह

शक्यं जेतुं मनोराज्यं निर्विकल्पसमाधितः ।

सुसम्पादः क्रमात् सोऽपि सविकल्पसमाधिना ॥ ६२ ॥

शक्यम् इति । सोऽपि कुतः सिध्यति इत्याह - सुसंपाद इति ।

ननु अष्टाङ्ग-योगयुक्तस्य तथास्तु तद्रहितस्य का गतिः इत्यत आह -

बुद्ध-तत्वेन धीदोषशून्येनैकान्तवासिना ।

दीर्घं प्रणवमुच्चार्य मनोराज्यं विजीयते ॥ ६२ ॥

बुद्ध-तत्वेन धीदोषशून्येन एकान्तवासिना दीर्घं प्रणवमुच्चार्य मनोराज्यं विजीयते ॥

बुद्धमिति । बुद्धम् अवगतं तत्त्वं ब्रह्मात्मैक्य-लक्षणं येन सः बुद्ध-तत्त्वः तेन काम-क्रोधादि-बुद्धि-दोषरहितेन एकान्तवासिना विजनदेशनिवासशीलेन पुरुषेण दीर्घं षड्द्वादशादिमात्रोपेतं प्रणवम् ओङ्कारम् उच्चार्य मनोराज्यं विजीयते विनिवार्यते इत्यर्थः ॥६२ ॥

मनोराज्यविजये किं भवति इत्यत आह - जिते तस्मिन् इति ।

जिते तस्मिन् वृत्तिशून्यं मनस्तिष्ठति मूकवत् ।

एतत्पदं वसिष्ठेन रामाय बहुधेरितम् ॥६३ ॥

तस्मिन् जिते वृत्तिशून्यं मनस्तिष्ठति मूकवत् । एतत्पदं वसिष्ठेन रामाय बहुधेरितम् ॥६३ ॥

यथा मूकः सकलवाग्व्यवहाररहितः तिष्ठत्येवं मनः अपि सर्वव्यापाररहितम् अवतिष्ठते इत्यर्थः । अवृत्तिकमनोवस्थानस्य पुरुषार्थत्वे प्रमाणम् आह - एतत्पदमिति । एतत् पदम् इयं दशा इत्यर्थः । ॥ ६३ ॥

दृश्यं नास्तीति बोधेन मनसो दृश्यमार्जनम् ।

सम्पन्नं चेत् तदुत्पन्ना परा निर्वाणनिर्वृतिः ॥ ६४ ॥

दृश्यं नास्तीति बोधेन मनसो दृश्य-मार्जनम् सम्पन्नं चेत् तद् परा निर्वाणनिर्वृतिः उत्पन्ना ॥ ६४ ॥

तर्हि निरतिश्यं मोक्षसुखं निष्पन्नम् इति जानीयाद् इत्यर्थः ।

किञ्च अद्वैतशास्त्रमत्यर्थं विचारितं तथा परस्परं गुरुशिष्यादि-संवादद्वारा चिरकालं प्रत्यायितं च । एवं कृत्वा किं निश्चितम् इत्यत आह-

विचारितमलं शास्त्रं चिरमुद्ग्राहितं मिथः ।

संत्यक्तवासनान्मौनादृते नास्त्युत्तमं पदम् ॥ ६५ ॥

शास्त्रम् अलं विचारितं । मिथा चिरम् उद्ग्राहितम् । सत्यक्तवासनात् मौनात् ऋते उत्तमं पदं न अस्ति ॥६५ ॥

संत्यक्तेति । संयक्-परित्यक्त-कामादि-वासनात् मनसः तूष्णीं भावात् ऋते अधिकः पुरुषार्थः नास्तीति निश्चितम् इत्यर्थः ॥६५ ॥

एवं निर्वृत्तिकस्य चित्तस्य प्रारब्धकर्मणा विक्षेपे सति तत्प्रतीका आरोप्य कः इति अपेक्षायाम् आह-

विक्षिप्यते कदाचिद्धीः कर्मणा भोगदायिना ।

पुनः समाहिता सा स्यात्तदैवाभ्यासपाटवात् ॥ ६६ ॥

भोगदायिना कर्मणा धीः कदाचित् विक्षिप्यते तदा सा अभ्यासपाटवात् पुनः समाहिता स्यात् ॥

विक्षिप्यत इति । भोगप्रदेन प्रारब्धकर्मणा बुद्धिः कदाचित् विक्षिप्यते चेत् तर्हि बुद्धिः अभ्यास-दाढर्यात् तदैव पुनरपि समाहिता स्यात् इत्यर्थः ॥६६ ॥

सदा चित्तविक्षेपरहितस्य ब्रह्मवित्त्वम् अपि औपचारिकम् इत्याह-

विक्षेपो यस्य नास्त्यस्य ब्रह्मवित्त्वं न मन्यते ।

ब्रह्मैवायमिति प्राहुर्मुनयः पारदर्शिनः ॥ ६७ ॥

यस्य विक्षेपः न अस्ति अस्य ब्रह्मवित्त्वं न मन्यते । पारदर्शिनः मुनयः अहं ब्रह्म एव इति प्राहुः ॥६७ ॥

विक्षेप इति । पारदर्शिनः वेदान्तपारगाः इत्यर्थः ॥६७ ॥

अत्रापि वसिष्ठवाक्यम् उदाहरति-

दर्शनादर्शने हित्वा स्वयं केवलरूपतः ।

यस्तिष्ठति स तु ब्रह्मन् ब्रह्म न ब्रह्मवित्स्वयम् ॥ ६८ ॥

यः दर्शनादर्शने हित्वा स्वयं केवलरूपतः तिष्ठति । सः तु ब्रह्मन् स्वयं ब्रह्म । ब्रहमवित् न ॥६८ ॥

दर्शनादर्शनेति । यो ब्रह्म जानामि न जानामि इति व्यवहारद्वयं परित्यज्य स्वयम् अद्वितीय-चैतन्यमात्र-रूपेण अवतिष्ठते सः स्वयं ब्रह्मैव न ब्रह्मवित् इत्यर्थः ॥६८ ॥

सकलद्वैतविवेचनम् उपसंहरति-

जीवन्मुक्तेः परा काष्ठा जीवद्वैतविवर्जनात् ।

लभ्यतेऽसावतोऽत्रेदमीशद्वैताद्विवेचितम् ॥ ६९ ॥

असौ जीवन्मुक्तेः परा काष्ठा जीवद्वैतविवर्जनात् लभ्यते अतः अत्र इदं ईश्वरद्वैतात् विवेचितम् ॥६९ ॥

॥ चतुर्थं द्वैतविवेकप्रकरणम् ॥

ईश्वरेण जीवेन अपि सृष्टं द्वैतं विविच्यते । विवेके सति जीवेन हेयः बन्धः स्फुटीभवेत् ॥१ ॥

मायां तु प्रकृतिं विद्यात् । मायिनं तु महेश्वरं (विद्यात् ।) । सः मायी सृजति इति श्वेताश्वतरशाखिनः आहुः ॥२ ॥

इदम् अग्रे आत्मा वै अभूत् । सः सृजै इति ईक्षत । सः संकल्पेन एतान् लोकान् असृजत् इति बह्वृचाः ॥३ ॥

खं वाय्वग्निजल-उर्व्योषधि-अन्नदेहाः अमी अखिलाः क्रमात् तस्मात् एतस्मात् आत्मनः ब्रह्मणः संभूताः ॥४ ॥

अहम् एव बहु स्याम् । अतः प्रजायेय । इति कामतः तपः तप्त्वा सर्वं जगत् असृजत् इति तित्तिरिः आह ॥५ ॥

अग्रे इदं सद् एव आसीत् । तत् बहुत्वाय ऐक्षत च । तेजोऽबन्नाण्डजादीनि ससर्ज इति सामगाः ॥६ ॥

यथा वह्नेः विस्फुलिङ्गाः जायन्ते तथा अक्षरतः विविधाः चिज्जडाः भावाः इति आथर्वणिका श्रुतिः ॥७ ॥

पूर्वं जगत् अव्याकृतम् आसीत् । अधुना दृश्याभ्यां नामरूपाभ्यां व्याक्रियत । ते विराडादिषु स्फुटे ॥८ ॥

विराट् मनुः नराः गावः खर-अश्व-अजावयः तथा पिपीलिकावधि द्वन्द्वम् इति वाजसनेयिनः ॥९ ॥

ईश्वरः जैवं रूपान्तरं कृत्वा देहे प्राविशत्। इति ताः श्रुतयः आहुः। प्राणधारणात् जीवत्वम्॥१०॥

यदधिष्ठानं चैतन्यम् पुनः यः च लिङ्गदेहः लिङ्गदेहस्था चिच्छाया तत्सङ्घः जीवः उच्यते॥११॥

माहेश्वरी तु या माया तस्याः निर्माणशक्तिवत् मोहशक्तिः च विद्यते। असौ तं जीवं मोहयति॥१२॥

मोहात् अनीशतां प्राप्य वपुषि मग्नः शोचति। इदम् ईशसृष्टं सर्वं द्वैतं समासतः उक्तम्॥१३॥

सप्तान्नब्राह्मणे जीवसृष्टं द्वैतं प्रपञ्चितम्। पिता सप्त अन्नानि ज्ञानेन कर्मणा अजनयत्॥१४॥

एकं मर्त्यान्नम्। द्वे देवान्ने। चतुर्थकं पश्वन्नम्। अन्यत् त्रितयम् आत्मार्थम्। अन्नानां विनियोजनम्॥१५॥

व्रीह्यादिकं दर्शपूर्णमासौ क्षीरं तथा मनः वाक् प्राणाः च इति अन्नानां सप्तत्वम् अवगम्यताम्॥१६॥

यद्यपि एतानि स्वरूपतः ईशेन निर्मितानि तथापि जीवः ज्ञानकर्मभ्यां तदन्नताम् अकार्षीत्॥१७॥

जगत् ईशकार्यं जीवभोग्यं द्वाभ्यां समन्वितम्। यथा योषित् पितृजन्या भर्तृभोग्या तथा इष्यताम्॥१८॥

मायावृत्यात्मकः ईशसङ्कल्पः हि साधनं जनौ। मनोवृत्यात्मकः जीवसङ्कल्पः भोगसाधनं॥ १९

ईशनिर्मितमण्यादौ एकविधे वस्तुनि स्थिते भोक्तृधीवृत्तिनानात्वात् तद्भोगः बहुधा इष्यते॥२०॥

एकः मणिं लब्ध्वा हृष्यति हि। अन्यः अलाभतः क्रुद्धयति। अत्र विरक्तः पश्यति एव। न हृष्यति न कुप्यति॥२१॥

मणिगाः प्रियः अप्रियः उपेक्ष्यः च इति त्रयः आकाराः जीवैः सृष्टाः। त्रिषु साधारणं रूपम् ईशसृष्टम्॥२२॥

भार्या स्नुषा ननान्दा याता माता च इति अनेकधा योषित् प्रतियोगिधिया भिद्यते। न स्वरूपतः॥२३॥

ननु ज्ञानानि भिद्यन्ताम् आकारः तु न भिद्यते। योषिद्वपुषि जीवनिर्मितः अतिशयः न दृष्टः॥२४॥

मा एवम्। काचित् मांसमयी योषित्। अन्या मनोमयी। मासमय्याः अभेदे अपि मनोमयी हि भिद्यते॥२५॥

भ्रान्ति-स्वप्न-मनोराज्य-स्मृतिषु मनोमयम् अस्तु। जाग्रन्मानेन मेयस्य मनोमयता न इति चेत्॥२६॥

बाढम्। माने विषयाऽऽकृतिः तु मेयेन योगात् स्यात्॥ भाष्यवार्तिककाराभ्यां अयम् अर्थः उदीरितः॥२७॥

यथा ताम्रं मूषासिक्तं तन्निभं जायते तथा रूपादीन् व्याप्नुवत् चित्तं ध्रुवं तन्निभं

दृश्यते ॥२८॥

यथा वा व्यञ्जकः आलोकः व्यंग्यस्य आकरताम् इयात्। धीः सर्वार्थ-व्यञ्जकत्वात् अर्थाकारा प्रदृश्यते ॥२९॥

मातुः मानाभिनिष्पत्तिः। निष्पन्नम् तत् मेयम् एति च। तत् मेयाभिसंगतं मेयाभत्वं प्रपद्यते ॥३०॥

एवं सति मृन्मयधीमयौ घटौ विषयौ द्वौ स्तः। मृन्मयः मानमेयः धीमयः तु साक्षिभास्यः स्यात् ॥३१॥

अन्वयव्यतिरेकाभ्यां धीमयः जीवबन्धकृत्। अस्मिन् सति सुखदुःखे स्तः। असति तस्मिन् न द्वयम् ॥३२॥

नरः स्वप्नादौ बाह्यार्थे च असति अपि बद्धयेत। समाधिसुप्तिमूर्च्छासु अस्मिन् सति अपि न बद्धयते ॥३३॥

दूरदेशं गते पुत्रे जीवति एव अत्र तत्पिता विप्रलंभकवाक्येन मृतं मत्वा प्ररोदिति ॥३४॥

तस्मिन् मृते अपि वार्तायाम् अश्रुतायां न रोदिति। अतः सर्वस्य जीवस्य मानसं जगत् बन्धकृत् ॥३५॥

बाह्यार्थ-वैयर्थ्यात् इह विज्ञानवादः स्यात् इति चेत्। न। हृदि आकारम् आधातुं बाह्यस्य अपेक्षितत्वतः ॥३६॥

वा वैयर्थ्यम् अस्तु। बाह्यं वारयितुं न ईश्महे। मानानि प्रयोजनं न अपेक्षन्ते इति

हि स्थितिः ॥३७ ॥

मानसं द्वैतं बन्धः चेत्। तत् निरोधेन शाम्यति। अतः योगम् एव अभ्यसेत्। ब्रह्मज्ञानेन किं वद ॥३८ ॥

तात्कालिकद्वैतशान्तौ अपि आगामि-जनिक्षयः ब्रह्मज्ञानं विना न स्यात् इति वेदान्तडिंडिमः ॥३९ ॥

ईशसृष्टे द्वैते अनिवृत्ते अपि तस्य मृषात्मताम् बुध्वा वस्त्वैक्यवादिनः अद्वयं ब्रह्म बोद्धुं शक्यम् ॥४० ॥ ।

प्रलये तन्निवृत्तौ तु विरोधि-द्वैत-अभावे अपि गुरुशास्त्राद्यभावतः अद्वयं बोद्धुं शक्यं न ॥४१ ॥

ईश्वरनिर्मितं द्वैतम् अबाधकं च साधकं च अपनेतुम् अशक्यम् इति तत् आस्ताम्। कुतः द्विष्यते ॥४२ ॥

जीवद्वैतं तु शास्त्रीयम् अशास्त्रीयम् इति द्विधा। तत्त्वस्य आ अवबोधनात्। शास्त्रीयम् उपाददीत ॥ ४३ ॥

आत्मब्रह्मविचाराख्यं शास्त्रीयं मानसं जगत्। तत्त्वे बुद्धे तत् च हेयम् इति श्रुत्यनुशासनम् ॥४४ ॥

मेधावी शास्त्राणि अधीत्य च पुनः पुनः अभ्यस्य परमं ब्रह्म विज्ञाय अथ उल्कावत् तानि उत्सृजेत् ॥४५ ॥

मेधावी ग्रन्थम् अभ्यस्य ज्ञानविज्ञानतत्परः सन् धान्यार्थी पलालम् इव अशेषतः ग्रन्थं त्यजेत् ॥४६ ॥

धीरः ब्राह्मणः तमेव विज्ञाय प्रज्ञां कुर्वीत। बहून् शब्दान् न अनुध्यायात् हि तत् वाचः विग्लापनम् ॥४७॥

एकं तमेव विजानीथ हि। अन्याः वाचः विमुञ्चत। प्राज्ञः वाङ्मनसी यच्छेत् इत्याद्याः श्रुतयः स्फुटाः ॥४८॥

अशास्त्रीयं द्वैतम् अपि तीव्रं मन्दम् इति द्विधा। कामक्रोधादिकं तीव्रम्। तथा मनोराज्यम् इतरत् ॥४९॥

उभयं तत्त्वबोधात् प्राक् बोधसिद्धये निवार्यम्। यतः शमः समाहितत्वं च साधनेषु श्रुतम् ॥५०॥

च बोधात् ऊर्ध्वं जीवन्मुक्तिप्रसिद्धये तत् हेयम्। कामादिक्लेशबन्धेन युक्तस्य मुक्तता न हि ॥५१॥

इयं जीवन्मुक्तिः मा भूत्। तु जन्माभावे अहं कृती। तर्हि जन्म अपि ते अस्तु एव। स्वर्गमात्रात् भवान् कृती ॥५२॥

यदा क्षयातिशयदोषेण स्वर्गः हेयः तदा स्वयं दोषतमात्मा अयं कामादिः किं न हीयते ॥५३॥

तत्त्वं बुद्ध्वा अपि निःशेषं कामादीन् न जहासि चेत् कर्मशास्त्रातिलङ्घिनः ते यथेष्टाचरणं स्यात् ॥५४॥

बुद्धाद्वैतस्वतत्त्वस्य यथेष्टाचरणं यदि अशुचिभक्षणे शुनां तत्त्वदृशां च एव कः भेदः ॥५५॥

बोधात् पुरा मनोमात्रदोषात् क्लिश्नासि। अथ अधुना च अशेषलोकनिन्दा इति अहो

ते भोगवैभवम् ॥५६ ॥

तत्त्ववित् भवान् विड्वराहादितुल्यत्वं मा काङ्क्षीः। सर्वधीदोषसंत्यागात् लोकैः देववत् पूज्यस्व ॥५७ ॥

काम्यादिदोष-दृष्ट्याद्याः कामादित्यागहेतवः मोक्षशास्त्रेषु प्रसिद्धाः। तान् अन्विष्य सुखी भव ॥५८ ॥

एषः कामादिः त्यज्यताम्। तु मनोराज्ये का क्षतिः। अशेषदोषबीजत्वात् भगवता क्षतिः ईरिता ॥५९ ॥

विषयान् ध्यायतः पुंसः तेषु संगः उपजायते। संघात् कामः संजायते। कामात् क्रोधः अभिजायते ॥६० ॥

निर्विकल्पसमाधितः मनोराज्यं जेतुं शक्यम्। सः अपि क्रमात् सविकल्पसमाधिना सुसंपादः ॥६१ ॥

बुद्धतत्त्वेन धीदोषशून्येन एकान्तवासिना दीर्घं प्रणवम् उच्चार्य मनोराज्यं विजीयते ॥६२ ॥

तस्मिन् जिते मनः वृत्तिशून्यं मूकवत् तिष्ठति। एतत् पदं वसिष्ठेन रामाय बहुधा ईरितम् ॥६३ ॥

दृश्यं नास्ति इति बोधेन मनसः दृश्यमार्जनं संपन्नं चेत् तत् परा निर्वाणनिर्वृत्तिः उत्पन्ना ॥६४ ॥

शास्त्रम् अलं विचारितम्। मिथः चिरम् उद्ग्राहितम्। संत्यक्तवासनात् मौनात् ऋते उत्तमं पदं न अस्ति ॥६५ ॥

भोगदायिना कर्मणा धीः कदाचित् विक्षिप्यते तदा सा अभ्यासपाटवात् एव पुनः समाहिता स्यात्॥ ६६॥

यस्य विक्षेपः न अस्ति अस्य ब्रह्मवित्त्वं न मन्यते। पारदर्शिनः मुनयः अयं ब्रह्म एव इति प्राहुः॥६७॥

ब्रह्मन् यः दर्शनादर्शने हित्वा स्वयं केवलरूपतः तिष्ठति सः तु स्वयं ब्रह्म। ब्रह्मवित् न॥६८॥

असौ जीवन्मुक्तेः परा काष्ठा जीवद्वैतविवर्जनात् लभ्यते अतः अत्र इदम् ईशद्वैतात् विवेचितम्॥६९॥